# विक्रमोर्वशीये रूपके काव्यरस विश्लेषणम्

HEMARAJA.N.S
PLANNING ASSISTANT
KARNATAKA SANSKRIT UNIVERSITY
PAMPA MAHAKAVI ROAD,
CHAMARAJAPETE, BENGALORE-18,
KARNATAKA
EMAIL- monihemu85@gmail.com
Ph.8310719147

'संस्कृतिः संस्कृताश्रिता' इत्यादिभिः वचोभिः भारतस्य अनुपमसंस्कृतेः आश्रयभूता इति सर्वैः संस्तूयमाना असौ संस्कृतभाषा मधुरा हृद्या सर्वमनोहारिणी च वर्तते । अनितरसाधारणायाः सुरवाण्याः साहित्यसिंहासने सुरसरस्वतीसमुपासकाः साहित्यशिरोमणयः व्यासभासकालिदासबाणभवभूत्यादयः अनेके कवितल्लजाः विराजमानाः वरीवर्तन्ते । तेषु उपमालङ्कारनिपुणः रसभावदीनां योजने निष्णातः कविकुलगुरुः कालिदासः संस्कृतसाहित्योत्तुङ्गे शिखामणिरिव शोभमानः राजते ।

संस्कृतसाहित्यजगतः विभिन्नेषु काव्यप्रकारेषु नदीष्णः महाकविः कालिदासः नितराम् अतिशेतेतरामितरान् कवीन् । संस्कृतसाहित्यप्रपञ्चे 'कविकुलगुरुः'इति ख्यातस्यास्य कविताशक्तिः प्रतिभा च अनितरसाधारणी अनन्यसदृशी च । "कालिदासो विलासः" 01 इति वाणी काव्येषु अस्य वैलास्यं दृढयति । वरकविः अयं संस्कृतसाहित्यस्य शाश्वतकीर्तिं सम्पाद्य वैश्विकीं मान्यतां प्राकल्पयत् ।

'भारतस्य द्वे प्रतिष्ठे संस्कृतं संस्कृतिस्तथा' इति संस्तूयमाना इयं संस्कृतभाषा अस्माकं भारतदेशस्य प्रतिष्ठात्वेन मन्यते । अनितरसाधारणायाः सुरवाण्याः अस्याः साहित्यम् अपारम् अनुपमं च वर्तते । संस्कृतसाहित्ये प्राधान्येन वैदिकसहित्यं लौकिकसाहित्यम् इति भेदद्वयं दृश्यते । लौकिकसाहित्ये काव्यसाहित्यं शास्त्रसाहित्यम् इति पुनः भेदः वर्तते । काव्यशास्त्रयोः उपायभेदे सत्यपि उद्देश्यभेदः नास्ति । धर्मार्थकाममोक्षानां पुरुषार्थानां परिचयः लाभश्च संस्कृतसाहित्यस्य उद्देश्यम् ।

कालिदासीयरूपकेषु रसाध्ययनस्य अङ्गतया संस्कृतसाहित्यस्य विचारः विमर्शश्च अत्र विहितः इति कृत्वा अत्र ईषत् लक्ष्यते । संस्कृतसाहित्यस्य विवेचनावसरे साहित्यं नाम किम् ? इति प्रश्नः समुदेति । साहित्यं नाम सहितयोर्भावः इति शब्दमर्यादया सिद्ध्यति । सहितयोः नाम शब्दार्थयोः इति अर्थमर्यादया ज्ञायते । संस्कृतसाहित्ये वैदिकसाहित्यं लौकिकसाहित्यं चेति द्वेधा

विभागः भवति । तत्र अपौरुषेये वैदिकसाहित्ये ऋग्यजुस्सामाथर्वाख्याः चत्वारः वेदाः, शिक्षाव्याकरणादीनि षडङ्गानि, धनुर्वेदादयः उपवेदाः च अन्तर्भवन्ति ।

वेदाः शास्त्राणि च विधिनिषेधविधानेन प्रभुरिव 'एतत् कर्तव्यम् एतन्न कर्तव्यम्'इति शासन्ति इति हेतोः एतेषां प्रभुसंमितम् इति अभिधानम् । अनेन वैदिकसाहित्येन धर्मार्थकाममोक्षाख्याः चत्वारः पुरुषार्थाः, तत्त्वज्ञानं, मनसः शान्तिरपि च उपलभ्यन्ते । लौकिकसाहित्ये ऐतिहासिकसाहित्यं, पौराणिकसाहित्यं, काव्यसाहित्यं चेति प्राधान्येन विभागत्रयं दृश्यते । रामायणमहाभारतादीनि ऐतिहासिकसाहित्यानि । भागवतब्रह्माण्डादीनि अष्टादश पुराणानि उपपुराणान्यपि पौराणिकसाहित्ये अन्तर्भवन्ति । पुराणानि सदसद्विचारान् निरूप्य मित्रवत् जनान् सन्मार्गं सूचयन्ति इति हेतोः मित्रसंमितम् इति तेषाम् अभिधानम् ।

काव्यसाहित्यं तु विशालं सत् विपुलानां नाना प्रकाराणां काव्यानाम् आश्रयस्थानं भूत्वा सहृदयानां जनानां मनांसि आकर्षयति । काव्यानि कान्ता इव आत्यन्तिकप्रीत्या अनुनयेन च जनान् सन्मार्गे प्रवर्तयन्ति इष्टार्थं च प्रापयन्ति इति हेतोः एतेषां कान्तासंमितम् इति अभिधानम् ।

## ✪ **विक्रमोर्वशीयस्य स्थूलपरिचितिः** – Brief Introduction of Vikramorvasheeyam

कविकुलगुरुः कालिदासः संस्कृतनाटकसाहित्ये सर्वश्रेष्ठः इति पण्डिताः सर्वे मन्यन्ते । एषः असाधारणकवित्वशक्तिसम्पन्नः अवर्तत । कविरयं नैजकृतिषु स्वप्रतिभया कोमलभावनाः अभिव्यक्तवान् । अमूर्तस्य मूर्तरूपम् असौ सम्पादितवान् । विचारानुसारं रसानुगुणं भाषाप्रयोगं च चकार अयम् ।

कालिदासः द्वे महाकाव्ये द्वे खण्डकाव्ये त्रीणि नाटकानि च विरचयाम्बभूव । तत्प्रणीतानि त्रीणि नाटकानि मालविकाग्निमित्रं विक्रमोर्वशीयम् अभिज्ञानशाकुन्तलं चेति प्रख्यातानि । कालिदासस्य प्रथमं नाटकं मालविकाग्निमित्रं द्वितीयं नाटकं विक्रमोर्वशीयं तृतीयं च अभिज्ञानशाकुन्तलमिति विज्ञायते ।

## ✪ **विक्रमोर्वशीयस्य नामौचित्यम्**– Justification of the Name of Vikramorvasheeyam

विक्रमोर्वशीयं महाकविकालिदासस्य द्वितीयं नाटकरचनमस्ति । यद्यपि दृश्यकाव्यं रूपकमिति नाम्ना आहूयते । तादृशं च रूपकं दशधा । तत्र नाटकमन्यतमम् इत्यादि यथायथं पूर्वं चर्वितम् । उपरूपकाणि अष्टादश सन्ति । तत्र त्रोटकम् अन्यतमं विद्यते । प्रस्तुतं विक्रमोर्वशीयम्

उपरूपकभेदगतं त्रोटकमिति ज्ञायते । अस्य नाटकस्य प्रस्तावननायां विदूषकस्य इदं वचनं ‘अहमस्यां कालिदासग्रथितवस्तुना नवेन त्रोटकेन उपस्थास्ये’इति । तत् त्रोटकमिति बोधयति । त्रोटकानां लक्षणमेवमाह विश्वनाथः नैजे साहित्यदर्पणे –

“सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम् ।

त्रोटकं नाम तत्प्राहुः प्रत्यङ्कं सविदूषकम् ॥” [01]

सप्त अष्ट नव पञ्च वा अङ्कयुतं दिव्यादिकोभव्योभयचरित्रविषयं सर्वाङ्केषु विदूषकेण सहितं यदुपरूपकं तत् त्रोटकमिति प्राहुः पण्डिताः । अपि च त्रोटकमिदं शृङ्गारप्रधानकं भवेत् । उक्तलक्षणं प्रस्तुते विक्रमोर्वशीये अन्तर्भवति । यतः अत्र शृङ्गारः एव अङ्गी रसः । सामान्यतः विदूषकस्य उपस्थितिः सर्वत्र दृश्यते । दिव्यमानुषचरितं युक्तम् अत्र ।

अत्र दिव्या नायिका उर्वशी सन्तुष्टः राजा पुरुरवाः नायकः च विद्येते । तस्मात् उभयमपि दिव्यनायकत्वम् अत्र वर्तते ।

कालिदासस्य काव्येषु नाटकेषु च व्यञ्जनावृत्तिः प्रधान्या अस्ति । तस्मात् एतस्य वर्णनं घटनं सङ्केतात्मकं वर्तते । अभिज्ञानशाकुन्तले प्रारम्भिकवर्णनैः आगामिघटता चयति कविः कालिदासः । नटीसूत्रधारयोः उक्तिषु, माविघटनानां स्पष्टसंकेतः लभ्यते । विक्रमोर्वशीये कविः मङ्गलश्लोके वेदान्तप्रसिद्धैकपुरुषत्वप्रतिपादनेन सूचितवान् इदं यत् अस्य त्रोटकस्य नायको अपि ऐतिहासिकपुरुषेषु अन्यतमोऽस्ति । पुरूरवा अपि स्वस्य अलौकिकगुणैः सर्वव्यापको वर्तते । शिवस्य ऐश्वर्यप्रदर्शनेन नाकस्य ऐश्वर्यं ध्वनितम् । द्वितीये अङ्के विदूषकस्य उक्तिः – ‘न शक्नोमि जनाकीर्णे कीर्तनेन आत्मनो जि`ां धारयितुम्’ इत्यनया रहस्योद्धाटनं ध्वनितं विद्यते । तृतीये अङ्के गुरोः शापेन इदं ध्वन्यते यत् उर्वशी भूलोके राजान्म उपस्यति इति । एवं चतुर्थाङ्कस्य प्रथमद्वितीयाङ्कयोः सूचितमिदं उर्वशीपुरूरवसौ द्वौ अपि नियोजेत पीडितां भविष्यतः इति । अत्र चतुर्थं श्लोके दृंसीव्याजेन सखी स्वस्थितिं अभिव्यनक्ति । पञ्चमेऽपि विरहिराज्ञः स्वावस्थायाः दर्शनं सूचितम् । अन्तिमश्लोकेषु अन्योक्तिद्वारा राजोर्वश्योः आनन्दस्य सूचना लक्ष्यति ।

- **प्रकृतिचित्रणम्**

कालिदासः प्रकृतिकोमलः कविः वर्तते । अनेकप्रकृति बहु आदिपते । अस्य प्रकृतेवर्णनेन ज्ञायते यत् मानवजीवने प्रकृते तथा प्रकृतौ मानवजीवनस्य साक्षात्मकारः दृश्यते । पर्वतस्फोवरनर्दणतिर्झरवतसूर्योदयरात्रीत्यादिप्राकृतिकसम्पद्वर्णनमन्यत्र दुर्लभमिति पण्डितानाम्

अभिप्रायः । विक्रमोर्वशीये रथस्थावेगेन उद्भूतधूल्याः ध्वजस्य च वर्णनं कालिदासस्य सूक्ष्मतिरीदाणशक्तेः कवित्वस्य निदर्शनं वर्तते । तदिदम् –

"अग्रे यान्ति रथस्य रेणुपदवीं चूर्णीभवन्तोद्यताः

चक्रभ्रान्तिररान्तरेषु वितनोत्यन्यामिवारावलीम्

चित्रारम्भविनिश्चलं हरिशिरस्यायामवच्चामरं

यन्मध्ये समवस्थितोध्वजपटः प्रान्ते च वेगानिलात् ॥" 05

अस्य चित्रणं सर्वथा कृत्रिमरहितम् आसीत् । द्वितीयोऽङ्के द्वाविंशतितमे श्लोके ग्रीष्मकालीनापरा तयेन तप्तमयूरभ्रमरजलकुक्कुटशुकानां स्वाभाविकवर्णनं दृष्टिपथम् आयाति । कालिदासः प्रकृत्या सह तादात्म्यम् अनुभूतवान् । सा प्रकृतिः सजीवेन मानवीयभावैः च पश्यति । मनुष्यस्य सुखदुःखयोः स दयोर्णिसहानुभूतिरूपाभ्यामपि प्रकृतिं कालिदासः दृष्टवान् । मनुष्यप्रकृतिमध्ये परस्परम् आदातप्रदानमस्ति इति निरूपयति ।

## ✪ विक्रमोर्वशीये रसविमर्शः

काव्ये रसास्वादः एव परमं लक्ष्यम् इत्यत्र आलङ्कारिकेषु ऐकमत्यं वर्तते । सः अनुभवसिद्धः विषयः । तादृशः रसः नवधा । 'रस्यते आस्वाद्यते रसादिः'इति रसः । रसादिपदेन रसाभासभावतदाभासादयोऽपि गृह्यन्ते । रसापेक्षया उक्तभावादयः प्रधानाः भवन्ति तर्हि ते भावध्वनिरिति आहूयन्ते । एवं काव्येषु रसप्रवाहः भावप्रवाहो वा भवेत् ।

प्रकृते विक्रमोर्वशीये नाटके रसाः तत्पोषकगुणालङ्काररीतयः च विद्यन्ते । विक्रमोर्वशीयम् उपरूपकस्य त्रोटकस्य विषयोऽस्ति । नाटकोक्तं लक्षणमपि त्रोटके वर्तते तद्विशेषलक्षणेन सह । त्रोटकं पञ्चाङ्कयुतं शृङ्गारप्रधानकं च स्यात् । दिव्या नारी नायिका स्यादिति नियमः अस्ति । मानुषः महाराजः नायकः । एवं लक्षणोक्तं सर्वमत्र सङ्गतं भवति इति पूर्वं विवृतम् । रसः अत्र शृङ्गारः प्रधानो भवेदिति सोऽपि अत्र सङ्गतो भवति । शृङ्गारः प्रधानश्चेति शिष्टरसाः तत्र पोषकरूपेण स्युः । उक्ताः एते अंशाः विक्रमोर्वशीये सङ्गच्छन्ते ।

इह विक्रमोर्वशीये शृङ्गाररसः प्रधानः राजते । वीरहास्यौ रसौ पोषकपात्रम् आवहतः । केचन भावाः तत्र तत्र प्रधानाः इव भासन्ते । क्वचित् भावध्वनिः शोभते । अत्र वीरहास्यौ कस्मिंश्चिदपि प्राधान्यं न आप्नुताम् । केषुचित् नाटकेषु अङ्गरसाः ये सन्ति ते क्वचित् अङ्केषु

प्राधान्यम् आवहन्ति । अत्र तथा द्रष्टुं न शक्यते ।

नास्ति वीरस्य हास्यस्यापि प्राधान्यं कुत्रचित् । पूर्वोक्तवत् केचन भावाः अत्र प्राधान्येन व्यज्यन्ते । परं भावानां प्राधान्यं समग्राङ्कव्यापि न । प्राधान्येन व्यक्ताः भावादयः प्रधानं शृङ्गाररसं सम्पोषयन्ति । पोषकरूपाः एते सर्वे भावादयः अङ्गरूपेण विराजन्ते ।

प्रागेव उक्तः प्रधानः रसः शृङ्गारो विक्रमोर्वशीये नाटके । स च शृङ्गारः विप्रलम्भः सम्भोगश्चेति द्विधा विभज्यते । अत्र नाटके सम्भोगशृङ्गारः अङ्गी रसः । स च विप्रलम्भशृङ्गारेण परिपुष्टः सन् शोभते । तस्मात् इह विप्रलम्भोऽपि आस्वाद्यमानो अस्ति । प्रथमाङ्के उर्वशीपुरूरवसोः परस्परं दर्शनं सञ्जातम् । तद्द्वारा द्वयोः अनुरागस्य निश्चयः अभवत् । तस्मात् मानसिकसंयोगः जातः इति कृत्वा अत्राङ्के सम्भोगशृङ्गारः । क्वचित् वीरोऽपि अनुभूयते । द्वितीयाङ्के विप्रलम्भशृङ्गारः सम्भोगशृङ्गारश्च वर्तते । विदूषकवचनात् हास्यरसोऽपि अनुभूयते । तृतीयाङ्के प्रधानतया सम्भोगशृङ्गारः वर्तते । चतुर्थाङ्के विप्रलम्भशृङ्गारः विशेषतया अनुभूतः अस्ति ।

विक्रमोर्वशीये प्रधानः रसः शृङ्गारः इति पूर्वमेव विवृतम् । सः शृङ्गारः विप्रलम्भेन सम्भोगेन च अत्र सिद्ध्यति । एवं च तादृशस्य शृङ्गारस्य विवरणं बहुभिः उदाहरणैः अत्र प्रस्तुतीक्रियते ।

प्रथमे अङ्के राक्षसापहरणेन मूर्च्छिताम् उर्वशीं तस्याः रक्षकः राजा पुरूरवाः उत्थापयितुं प्रयतमानः सखीं चित्रलेखां प्रति एवं वक्ति । तद्यथा –

"मन्दारकुसुमदाम्ना गुरुरस्याः सूच्यते हृदयकम्पः ।

मुहुरुच्छ्वसता मध्ये परिणाहवतो पयोधरयोः ॥"[08]

अप्सरोगणात् उर्वशीं राक्षसाः अपाहरन् । तदा सूर्योपस्थानात् निर्गतः राजा तां देवताकन्यां राक्षसात् रक्षितुमुद्युक्तो भवति । राक्षसैः सह घोरयुद्धं कृत्वा तां रक्षित्वा मेनकेत्यादितत्सखीगणसन्निधिमानयति । तदा मूर्च्छितायाः तस्याः स्थितिं तत्सख्यै चित्रलेखायैनिरूपयति राजा । उन्नतयोः स्तनयोः मध्ये मुहुर्मुहुः उच्छ्वसता मन्दारपुष्पमालया अस्याः उर्वश्याः हृदयकम्पः बहुः इति सूच्यते । धृतमालायाः कम्पनेन अस्याः हृदयकम्पः महान् इति ज्ञायते । ततश्च राक्षसापहरणेन तस्याः भयं कीदृशमित्यपि ज्ञायते ।

अत्र नायकस्य पुरूरवसः आलम्बनविभावः नायिका उर्वशी, पुरो वर्तमानायाः मूर्च्छितायाः उर्वश्याः देहसौन्दर्यम् उद्दीपनविभावः, रोमाञ्चसूक्ष्माभिलाषनायिकावर्णनानि अनुभावाः, हर्षोत्साहवितर्काः सञ्चारिभावाः । एतेषां विभावानुभावव्यभिचारिभावानां संयोगात् रतिस्थायिभावः सामाजिके उद्बुद्धः सन् शृङ्गाररसतां भजते । अत्र पुरूरवसि नायिकोर्वशीविषयकरतिः सूक्ष्मम् अङ्कुरिता वर्तते । अभिलाषः तु नायिकावर्णनेन अवगम्यते । इदं वचनं चित्रलेखां प्रति पुरूरवाः वदति तथापि तत्र विषयः उर्वशी । अत्र अनुरागस्य स्थितिः मन्दारकुसुमोन्नतपयोधरादिपदोपन्यासेन अवबुद्ध्यते । यद्यपि द्वयोरपि नायिकानायकयोः परस्परं दर्शनं न सम्भूतं तथापि आगामिनः अनुरागस्य बीजमिदम् इति प्रेक्षके तत्सूचनम् उपलभ्यते च इति कृत्वा अत्र शृङ्गारानुभूतौ न कोऽपि बाधः ।

प्रथमाङ्के प्राप्तसंज्ञाम् उर्वशीं दृष्ट्वा राजा पुरूरवाः तस्याः सौन्दर्यं वर्णयति । तद्यथा –

“अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः

शृङ्गारैकरसस्स्वयं नु मदनो मासो नु पुष्पाकरः ।

वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो

निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥”09

राजा पुरूरवाः उर्वश्याः सौन्दर्यं पश्यति । सा नारायणर्षेः ऊरूसम्भवा इति कथां सः स्मृतवान् । तदन्तरं सा उर्वशी तपस्विसम्भवा नेति ऊहते । तत्र कारणम् इदमिति निरूपयति – ‘अस्याः सृष्टिकर्मणि कान्तिप्रदः चन्द्रः प्रजापतिः अभूत् किम् ? चन्द्रः अस्याः सृष्टिकर्ता स्यात् इति भावः अथवा शृङ्गाररसे नितान्तं निमग्नः साक्षात् मदनः प्रजापतिः अभूत् किम् ? पुष्पाकारः वसन्तमासः अस्याः उर्वश्याः प्रजापतिरभूत् किं वा ? वेदाभ्यासजडः भोगपदार्थेभ्यः क्षीणकुतूहलः पुराणः नारायणर्षिः दृश्यमानम् इदं मनोहरं रूपं निर्मातुं कथं नु शक्नुयात् ?’ इति । विषयविमुखः वेदाभ्यासजडः मुनिः रूपमिदं न निर्मितवान् अपि तु शृङ्गारसम्बद्धचन्द्रादिः उर्वश्याः निर्माता स्यात् इति भावः अत्र अवलोकनीयः ।

अत्र नायकस्य पुरूरवसः उर्वशी आलम्बनविभावः, नायिकायाः उर्वश्याः सौन्दर्यं समयश्च उद्दीपनविभावः, अभिलाषनायिकासौन्दर्यगुणकथनादीनि अनुभावाः, हर्षवितर्कोत्साहादयः व्यभिचारिणः । एतेषां विभावादीनां संयोगात् रतिस्थायिभावः सामाजिके शृङ्गररसताम् आप्नोत् । अयं सम्भोगशृङ्गारः इति विविच्यते । नायिकायाः उर्वश्याः उपस्थितिरत्रास्ति । तस्याः मनसि रागविषयकरतिभावः श्लोके न प्रकटितः इति सम्भोगशृङ्गारः न इति मा वदेयुः । पूर्वं गद्ये प्रज्ञाप्राप्त्यनन्तरम् उर्वशी पुरो वर्तमानं राजानं पश्यन्ती ‘उपकृतं खलु ? दानवेन्द्रसंरम्भेण’ इति

यदवदत् तेन च रागविषयकप्रीतिः अवगता वर्तते । एवं समयः प्रसङ्गो वा उर्वश्याः प्रीतिं ज्ञापयति । तस्मात् द्वयोरपि नायिकानायकयोः उर्वशीपुरूरवसोः मानसिकसंयोगो वर्तते इति अत्र सम्भोगशृङ्गारः । अत्र अनुमानालङ्कारः वर्तते । वैदर्भीरीतिः प्रसादगुणश्च । एते सर्वे शृङ्गाररसोत्कर्षकाः अंशाः सन्तीति आलङ्कारिकाणां समयः ।

प्रथमाङ्के हेमकूटपर्वते रथात् उर्वशी राजा च अवतरतः । तदा उर्वशी रथावतारक्षोभं नाटयन्ती राजानमवलम्बते । तदा राजा इदं वर्णयति –

"यदिदं रथसंक्षोभादङ्गेनाङ्गं ममायतेक्षणया ।

स्पृष्टं सरोमकण्टकमङ्कुरितं मनसिजेनेव ॥"[10]

राजा पुरूरवाः उर्वश्याः स्पर्शेण जातरोमाञ्चं वर्णयति –'रथसंक्षोभात् दीर्घनेत्रायाः उर्वश्याः अङ्गेन मम इदमङ्गं सरोमाञ्चं मनसिजेन अङ्कुरितमिव स्पृष्टम् । उर्वश्याः अङ्गस्पर्शेण राज्ञः शरीराङ्गं रोमाञ्चितं तत् कामदेवेन अङ्कुरितमिव' इति ।

अत्र नायकस्य पुरूरवसः नायिका उर्वशी, उर्वश्याः नायकः पुरूरवाश्च आलम्बनविभावाः, उर्वश्या सह आकाशमार्गेण प्रयाणं तदङ्गस्पर्शनादीनि च उद्दीपनानि । कटाक्षवीक्षणस्नेहरोमाञ्चादिः अनुभावः । हर्षोत्साहसन्त्रासलज्जाश्च व्यभिचारिणः । एतेषां विभावादीनां रतिस्थायिभावः सामाजिके प्रकृष्टेन गम्यमानः शृङ्गाररसताम् आप्नोत् । नायिकानायकयोः उभयोः एकत्र सत्त्वात् दर्शनस्पर्शनादेश्च अयं सम्भोगशृङ्गारः । नायिकानिष्ठनायकरतिः तु प्रसङ्गवशात् ज्ञायते इति स्पष्टम् । अत्र उत्प्रेक्षालङ्कारः आर्यावृत्तं च वर्तते ।

प्रथमाङ्के राज्ञः पुरूरवसः स्वगतवचनं यथा –

"प्रियमाचरितं लता त्वया मे गमनेऽस्याः क्षणविघ्नमाचरन्त्या ।

यदियं पुनरप्यपाङ्गनेत्रा परिवृत्तार्धमुखी मया हि दृष्टा ॥"[11]

राजानं पुरूरवसं देवेन्द्रसन्देशानुसारं चित्ररथः उर्वश्या सह स्वर्गमागन्तुम् आह्वयति । तदा राजा तदाह्वानं सगौरवं निराकरोति । उर्वशीमेनकाद्यः स्वर्गं गन्तुम् उद्युक्ताः ।

तदा उर्वशी राज्ञः दर्शनव्याजेन लताविटपे वैजयन्तिकालग्नं निमित्तीकृत्य परावृत्य राजानं पश्यन्ती सख्या सह सम्भाषते । तस्याः एतदाचरणं जानन् पुरूरवाः एवं वदति –'हे लते ! अस्याः उर्वश्याः गमने क्षणविघ्नं कुर्वन्त्या त्वया मे प्रियमेव आचरितम् । यस्मात् दृश्यमाना

कटाक्षनेत्रा ईषत्पृष्ठतः कृतार्धानना इयमुर्वशी मया पुनरपि निश्चयेन दृष्टा' इति ।

अत्र नायकस्य पुरूरवसः उर्वशी, नायिकायाः उर्वश्याः नायकः पुरूरवाः च आलम्बनविभावः, नायके नायिकोपस्थितिदर्शनादीनि, नायिकायां नायकोपस्थितिगाम्भिर्यशौर्यादीनि च उद्दीपनविभावाः । अभिलाषनायिकागुणकथनं नायकपक्षे अभिलाषदर्शनाकांक्षाचेष्टादयः च नायिकापक्षे अनुभावाः, द्वयोरपि नायिकानायकयोः हर्षोत्साहावहित्थाः सञ्चारिणः भावाः । एतेषां विभावादीनां संयोगात् सामाजिके रतिस्थायिभावः उद्बुद्धः शृङ्गाररसतामाप्नोति । अत्र परस्परम् आलम्बनविभावः अस्ति इति सम्भोगशृङ्गारः । अत्र केवलं दर्शनमस्ति न तु स्पर्शनादीनि सन्तीति नात्र सम्भोगशृङ्गारः इति चेन्न । द्वयोरपि नायिकानायकयोः मानसिकसंयोगे सत्यपि अयं सम्भोगशृङ्गारः एव भवति । दम्पती एकत्र संयुक्तौ अपि मानसिकसंयोगः नाम अनुरागाभावे तत्र न सम्भोगशृङ्गारः इति ज्ञातव्यः ।

प्रथमाङ्के राजा पुरूरवाः गतामुर्वशीदिशम् अवलोक्य इदमाह –

"एषा मनो मे प्रसभं शरीरात्

पितुः पदं मध्यममुत्पतन्ती ।

सुराङ्गना कर्षति खण्डिताग्रात्

सूत्रं मृणालादिव राजहंसी ॥"[12]

आकाशमुत्पतन्तीमुर्वशीं पश्यन् राजा पुरूरवाः स्वदशामेवं वर्णयति –'पितुः नारायणमुनिरूपिविष्णोः आकाशम् उत्पतन्ती एषा उर्वशी मम शरीरात् उच्छिन्नाग्रभागात् मृणालात् सूत्रं राजहंसी इव हठात् मनः अपहरति' इति । एतेन द्वयोः नायिकानायकयोः अनुरागः स्पष्टः ।

अत्र नायकस्य पुरूरवसः नायिका उर्वशी आलम्बनविभावः, नायिकासौन्दर्यदर्शनादीनि उद्दीपनानि, अभिलाषनायिकासौन्दर्यगुणकथनादीनि अनुभावाः, हर्षोत्साहचिन्तादयः व्यभिचारिभावाः । एतेषां विभावादीनां संयोगात् रतिस्थायिभावः शृङ्गाररसरूपतां भजन् सहृदयास्वाद्योऽस्ति । अत्र सम्भोगशृङ्गारः एव संयोगविच्छित्त्यभावात् । अत्र उपमालङ्कारः प्रसादगुणः वैदर्भीरीतिः उअपजातिच्छन्दश्च विद्यते । एते सर्वे शृङ्गाररसोत्कर्षकाः सन्ति । काव्यम् आस्वाद्यमानं कुर्वन्त्येते ।

द्वितीयाङ्के राजा पुरूरवाः उर्वशीं स्मरन् सख्यौ विदूषके तस्याः सौन्दर्यं वर्णयति यथा –

"आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः ।

उपमानस्यापि सखे प्रत्युपमानं वपुस्तस्याः ॥"[13]

राजा पुरूरवाः विदूषके माणावके स्वमनोभिलाषम् उर्वशीसौन्दर्यं च भाषते एवम् –'सखे ! तस्याः उर्वश्याः वपुः आभरणस्यापि आभरणं विद्यते । सौन्दर्यसामग्र्याः प्रसाधनविशेषः एवास्ति । उपमानवस्तुनः अपि प्रत्युपमानम् आस्ते' इति । एतेन वर्णनेन उर्वश्याः अतिशयं सौन्दर्यं ज्ञायते ।

अत्र नायकस्य पुरूरवसः उर्वशी आलम्बनविभावः, नायिकासौन्दर्यस्मरणमित्रसाहचर्यादीनि उद्दीपनानि, अभिलाषनायिकागुणकथनम् अनुभावाः, हर्षोत्साहस्मृतयश्च सञ्चारिभावाः ।

एतेषां विभावादीनां संयोगात् प्रेक्षके रतिस्थायिभावः प्रकृष्टोद्बुद्धः सन् शृङ्गाररसतामाप्नोति । अयं विप्रलम्भशृङ्गारः नायिकानुपस्थितेः । नायिकानुस्मरणं गुणकथनं च विप्रलम्भशृङ्गारदशाः । अयं विप्रलम्भशृङ्गारः तात्कालिकः भाविसङ्गमसम्भवात् । अत्र व्यतिरेकालङ्कारः, आर्याच्छन्दश्च भवति ।

द्वितीयाङ्कस्य अन्यतमः श्लोकः । राजा पुरूरवाः स्वविरहवेदनां दूरीकर्तुं विदूषकानुरोधं तेन सह उद्यानं प्रविशति । तत्रत्यं वर्णनमिदं यथा –

"इदमसुलभवस्तुप्रार्थनादुर्निवारं

प्रथममपि मनो मे पञ्चबाणः क्षिणोति ।

किमुत मलयवातोन्मूलिता पाण्डुपत्रै–

रुपवनसहकारैर्दर्शितेष्वङ्कुरेषु ॥"[14]

राजा पुरूरवाः प्रमदवनं प्रविश्य विदूषकं वदति स्वमदनबाधामधिकृत्य एवम् –'कामदेवः इदम् असुलभवस्तुप्रार्थनायां दुर्निवारं मम मनः पूर्वमेव कृशं करोति । मलयानिलोत्यातिताल्पपाण्डुपत्रैः प्रमदवनाम्रवृक्षैः प्रकटितेषु अङ्कुरेषु सत्सु वक्तव्यं किं' इति । पूर्वमेव मदनबाधेन कृशितोऽहम् । पुनः प्रमदवनं प्रविश्य आम्रवृक्षाणां नवपल्लवानवलोक्य मम पीडा इतोऽपि एधते इति पूरूरवसः वाचाम् अर्थः ।

अत्र नायकस्य राज्ञः पुरूरवसः वचनस्य उर्वशी आलम्बनविभावः, मित्रसाहचर्यप्रमदवननायिकास्मरणादीनि उद्दीपनानि, नायिकास्मरणोद्वेगप्रमदवनवर्णनम् अनुभावः, चिन्तामोहादयः व्यभिचारिभावाः । एतेषां विभावादीनां संयोगात् रतिस्थायिभावः आस्वाद्यमानः सन् शृङ्गाररसतामाप्नोति । नायिकास्मरणानुपस्थित्यादेः विप्रलम्भशृङ्गारोऽयम् ।

राजा वचनमिदं विदूषके वदति, परन्तु वचनविषयिणी उर्वशी एव इति कृत्वा अत्र आलम्बनविभावः उर्वशी एव न तु विदूषकः इति आकलनीयम् ।

द्वितीयेऽङ्के राजा पुरूरवाः स्वमदनबाधां विदूषके निवेदयति । तद्यथा –

"हृदयमिषुभिः कामस्यान्तः सशल्यमिदं सदा

कथमुपलभे निद्रां स्वप्ने समागमकारिणीं ।

न च सुवदनमालेख्येऽपि प्रियामसमाप्य तां

मम नयनयोरुद्बाष्पलां सखे न भविष्यति ॥" 15

नायकः पुरूरवाः प्रमदवने अधिकां विरहवेदनाम् अनुभवति । विरहवेदनपरिहाराय विदूषकं वदति । सः विदूषकः –'स्वप्नसमागमकारिणीं निद्रां करोतु अथवा तत्रभवत्याः उर्वश्याः चित्रं विलिख्य तदवलोकयन् आत्मानं विनोदय' इति उपायं सूचयति ।

तदा उपायद्वयमपि अनुपपन्नम् इति राजा वदन् तस्मै कारणं वर्णयति यथा –'मित्र ! कामस्य बाणैः मदीयमिदं हृदयं सदा अन्तस्सशल्यं नाम पीडितमस्ति । एवं स्थितौ स्वप्ने समागमकारिणीं निद्रां कथं नु उपलभे ? पुनश्च चित्रेऽपि मन्मनसि स्थितां तां सुवदनां प्रियामुर्वशीं पूर्णामकृत्वा मम नयनाभ्यां बाष्पं न निर्गमिष्यतीति न । अपि तु बाष्पं निर्गमिष्यति एव' इति ।

अत्र निद्रायाः अनुपपत्तौ स्वप्नः नास्ति । स्वप्नाभावे उर्वश्या सह समागमः नास्ति । एवं तस्याः उर्वश्याः पूर्णचित्रलेखनात् पूर्वमेव नयनाश्रूणि उद्गच्छेयुः । तस्मात् द्वाभ्यामपि विनोदकारकाभ्यां कारणाभ्यां विदूषकोक्ताभ्यां राज्ञः मनः न कथञ्चित् नन्द्यते इति भावः । तस्मादेव राजा विदूषकवचनम् अनुपपन्नमित्यकथयत् ।

अत्र नायकस्य पुरूरवसः वचनस्य उर्वशी आलम्बनविभावः, वचननायिकानुस्मरणमित्रोपस्थितयः उद्दीपनविभावाः, अभिलाषचिन्तानायिकास्मरण– सम्प्रलापाश्च अनुभावाः, चिन्तावेगस्मृतयः व्यभिचारिणः । एतेषां विभावादीनां संयोगात् रतिस्थायिभावः शृङ्गाररसतां सम्पद्यते । अत्र नायिकानुस्मरणप्रलापादीनां सत्त्वात् विप्रलम्भशृङ्गाररसोऽयम् । अत्र वैदर्भी रीतिः माधुर्यं गुणः हरिणी छन्दश्च शोभन्ते ।

पञ्चमेऽङ्के महाराजः सुतमुखदर्शनात् पुनः प्रियतमायाः विरहमनुभवेत् इति रोदिति । अथ निर्धारं प्रकटीकरोति यथा –

"न हि सुलभवियोगा कर्तुमात्मप्रियाणि

प्रभवति परवत्ता शासने तिष्ठ भर्तुः ।

अहमपि तव सूनावद्य विन्यस्य राज्यम्

विचरितमृगयूथान्याश्रयिष्ये वनानि ॥" 26

महाराजं प्रति उर्वशी शापवृत्तान्तं देवेन्द्रेण प्रकल्पिततद्विमोचनवृत्तान्तं च अकथयत् । राजा तच्छ्रुत्वा शापविमोचनमनुमन्य स्वानुरागपूर्वकं निर्धारं प्रकटयति एवम् –'सुलभवियोगा पराधीनता स्वाभिष्टानि कर्तुं न हि प्रभवति । अतस्त्वं भर्तुः इन्द्रस्य शासने तिष्ठ । अहमपि अस्मिन् दिवसे तव पुत्रे राज्यं संस्थाप्य सञ्चारमृगसमूहानि वनानि आश्रयिष्ये' इति । अयं विरहः मदधीनो न । तस्मात् अस्मदिच्छा न फलिता भविष्यति । त्वं देवेन्द्रस्य वचनं शृणु । अहं राज्यं पुत्राधीनं कृत्वा वनं यामि इति राजा पुरूरवाः प्रियतमामुर्वशीमाह ।

अत्र नायकस्य पुरूरवसः उर्वशी आलम्बनविभावः, उर्वश्याश्च पुरूरवाः आलम्बनविभावः, नायिकादुःखेन्द्रशापवृत्तान्तादिः उद्दीपनविभावः नायके पुरूरवसि, पुनर्नायिकायां तु नायकागामिजीवनचिन्तेन्द्रशापवृत्तान्तादिः, स्वरभङ्गवैवर्ण्याश्रुप्रलापादयः उभयत्रापि अनुभावाः, विषादचिन्तोद्वेगमतयः द्वयोः नायिकानायकयोः व्यभिचारिभावाः । एतेषां विभावादीनां संयोगात् रतिस्थायिभावः सामाजिके शृङ्गाररसतामाप्नोत् । अयं विप्रलम्भशृङ्गारः । उभयोः नायिकानायकयोः सतोरपि विप्रलम्भे न कापि हानिः । अत्र अश्रुपातादिविप्रलम्भलक्षणात् आगामिविरहनिश्चयाच्च अत्र सः विप्रलम्भशृङ्गारः । अत्र अर्थान्तरन्यासालङ्कारः । मालिनी छन्दः । माधुर्यगुणः वर्तते ।

पूर्वोक्तश्लोकः पञ्चमाङ्कस्य । तत्रैव अङ्के नायकस्य राज्ञः पुरूरवसः नायिकायाः उर्वश्याश्च मनोरथः देवेन्द्रेण सम्पूरितः । तस्मात् विप्रलम्भः सम्भोगशृङ्गारे विश्रमति इति अवसेयः । एवं च अस्मिन् त्रोटकरूपनाटके शृङ्गाररसः एव प्रधानः ।

एतावदवधि लब्धोदाहरणैः नाटकस्य प्रधानः रसः विस्तरं व्याख्यातः । अत्र नाटके शृङ्गाररसस्य दत्तोदाहरणं दिग्दर्शनमिति सर्वैः सहृदयैः भाव्येत ।

## ✪ विक्रमोर्वशीये अङ्गरसाः – Minor Rasa in Vikramorvasheeyam

प्रधानरसो नाम अङ्गी रसः । विक्रमोर्वशीये अङ्गी रसः शृङ्गारः सोदहरणं विवृतम् । विक्रमोर्वशीये शृङ्गाररसं विहाय हास्यरसः वीररसः क्वचित् अद्भुतरसश्च विद्यन्ते । अङ्गिरसं शृङ्गारं ये पोषयन्ति ते अङ्गरसाः इति आहूयन्ते । एवं नानारसैः भूयिष्टं इदं काव्यं सहृदयानन्दजनको भूत्वा  जगति शोभते ।

विक्रमोर्वशीयं रसास्वादनदृष्ट्या उत्तमं नाटकमिति परिगण्यते विमर्शकैः । अत्र विविधरसाः भावाः सन्ति चेदपि समग्रप्रबन्धात्मकदृष्ट्या विचारयामश्चेत् अत्र प्रधानः रसः शृङ्गारः एव । तत्रापि सम्भोगशृङ्गारः एव भवति । तस्य हेतुः सहेतुकं पूर्वमेव विवृतः । एवं च विविधरसभावानां सन्ततप्रवाहेन नाटकमिदमास्वाद्यमस्ति । काव्यस्य परमं लक्ष्यं रसास्वादः । सः विक्रमोर्वशीयेन उपलब्धः । तस्मात् रूपकमदः सहृदयहृदयतले निश्चयं हि महत्तमं भूषणमावहति । तस्मात् कालिदासस्य रूपकमदः विक्रमोर्वशीयं प्रसिद्धिमगात् ।

**परामर्शनग्रन्थाः**

१. श्रीकृष्णमणिः त्रिपाठी – अभिज्ञानशाकुन्तलस्य विमला–चन्द्रकला–संस्कृतहिन्दीव्याख्यानम्

२. ध्वन्यालोकः आनन्दवर्धनः, चौकम्बा पब्लिकेशन्स्, वाराणसी, १९८०

३. साहित्यदर्पणः, विश्वनाथः, चौकम्बा पब्लिकेशन्स्, वाराणसी, १९७५

४. काव्यप्रकाशः, मम्मटःचौकम्बा पब्लिकेशन्स्, वाराणसी,२०००

५. विक्रमोर्वशीयम्, कालिदासः, चौकम्बा पब्लिकेशन्स्, वाराणसी, २००३

६.रामायणम् – वाल्मीकिमुनिः, परिमलपब्लिकेषन्स्, दिल्ली, १९९१ ।

७. वृत्तरत्नाकरः – केदारबट्टः, लक्ष्मीवेङ्कटेश्वरप्रेस्, कल्याण, मुम्बई, १८५० ।

८. रसगङ्गाधरः, पण्डितराज जगन्नाथः, चौकम्बा प्लिकेषन्स्, वाराणसी २००५।

९. संस्कृतसाहित्यम्, कृष्णमूर्तिः, प्रसाराङ्गम्, मय्सूरु विश्विविद्यालयः, मय्सूरु १९९०।

---

(कृपया मया प्रेशितं इदं शोधलेखनं भवत्शोधपत्रिकायां प्रकाशयन्तु इति प्रार्थये । तथैव अहं तु कर्नाटकसंस्कृतविश्वविद्यालये " कालिदासप्रणीत रूपकेषु काव्यरसतत्व विश्लेषणम् एकं विमर्शात्मकमध्ययनम्" इत्यस्मिन् विषये विद्यावारिधिं कुर्वन् अस्मि)